# MT - 172

**2013 .... .... 1200** **Seat No.** | | | | | | | |

**MT - 172 - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM I - PAPER - III**

**Time : 3 Hours** **(Pages 7)** **Max. Marks : 80**

**Q.I. (A) Translate *any three* of the following passages into English : 15**

(i) प्राचीनैषा कथा वस्तुवस्तुनः उपयोगः कथं करणीयः इति कथयति नः । क्षुद्रवस्तुनः निर्माणेऽपि नैसर्गिकसंसाधनं तथैव मानवीयपरिश्रमाणामावश्यकता विद्यते । चित्ताकर्षकं वस्तु क्रीत्वा पश्चाद् यदि न रोचते तर्हि सहजतया वयं बहिः त्यजामः । येन केनापि रूपेण वस्तुनः उपयोगः भवत्येव इति मनसि कर्तव्यम् । उपभुज्य त्यजत इति विचारं दूरीकृत्य विविधप्रकारैः पुनःपुनः उपयोगं कुरुत । मा कुरुत अनावश्यकक्रयणमिति भारतीया विचारसरणिः अनुकरणीया । स्मर्तव्यमिदं सर्वदा अमूल्यं विद्यते सर्वम् ।

(ii) अनिच्छयैव अन्येद्युः सोमशर्मा अनन्तभट्टं प्रति पद्भ्यामेव गतवान् । बालसूर्यस्य किरणेषु पद्भ्यां चलनेन प्रसन्नः सोमशर्मा, ''कृपया, भवान् सत्वरमुपचारं करोतु । शीघ्रं गन्तव्यं मया,'' इत्यवदत् । अनन्तभट्टोऽभाषत, ''भोः, भवान् प्रतिदिनं प्रभाते करणीयानि कार्याणि समाप्य उद्यानस्य निकटे प्रवहतो निर्झरस्य जले स्नात्वा प्रत्यागच्छतु ।'' अनन्तभट्टस्यादेशेन उद्विग्नः सोमशर्मा तत्स्थानं गत्वा स्नानं कृतवान् ।

(iii) समाप्तेऽध्ययने रॉथफिल्डमहोदयेन गुरुवर्यरवीन्द्रनाथटागोर-महोदयेन सार्धमस्य परिचयः कारितः। गुणी गुणिनं वेत्तीति सूक्त्यनुसारं रवीन्द्रनाथेन कोलकत्तानगरं स निमन्त्रितः । तत्र विनायकेन बेल्लूरमठस्य कृते श्रीरामकृष्णपरमहंसमहोदयस्य पूर्णाकृतिः प्रतिमा निर्मिता । रवीन्द्रनाथ-गान्धीमहोदयादीनां प्रतिमानिर्माणे रतस्यास्य कौशल्यं ज्ञात्वा टाटाकम्पनीप्रमुखेण स प्रगतशिक्षणार्थं लण्डनस्थितां रॉयलअॅकॅडमीसंस्थां प्रति प्रेषितः ।

(iv) एतावद् विशालं वनं द्रष्टुं द्वित्राः दिनाः न पर्याप्ताः, यतोऽस्य क्षेत्रं विस्तीर्णं वैविध्यपूर्णं च। विविधस्वरूपाणां खगानां कृते विविधप्रकाराणि स्थलानि अत्र निर्मितानि । स्थलपक्षिणां शुष्का तृणस्थली, जलविहगार्थं जलस्थली, आनूपं वा स्थलम् अपि च वृक्षखगानामधिवासभूताः महावृक्षा अपि अत्र विद्यन्ते । नैकाः सारङ्गागाराः विविधवर्णैः खगैः आवासार्थमङ्गीकृताः अत्र । वृक्षपक्षिणः, तृणपक्षिणः अपि च जलपक्षिणोऽपि अत्र बहुसंख्यया वसन्ति ।

(v) आचार्या - शृङ्गारहास्यरौद्रकरुणवीराद्भुतबीभत्सभयानकाः तथैव शान्त इति नवरसाः ख्याताः। अस्मिन् शास्त्रे सर्वरसानां देवताः वर्णाश्च वर्णिताः ।

अदितिः - आचार्ये ! अधुना विशेषेण वीररसविषये कथयतु भवती ।

आचार्या - आम् । उत्साहः वीररसस्य प्रधानगुणः । स इतरानपि उत्साहयति । अन्यः गुणः अध्यवसायः नाम दृढनिश्चयः दृढयत्नश्च । अपरः गुणः निश्चला बुद्धिः । स्थैर्यधैर्यवीर्यगर्वोत्साहपराक्रमादिप्रभावात्मकैरभिनयैः रसनिष्पत्तिः कर्तव्या ।

**Q.I. (B) Translate *any two* groups of verses into English :** **8**

**Group I**

(i) वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।
न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ।।

(ii) आगत्य च स गङ्गायास्तटाच्चिक्षेप वारिणि ।
उद्धृत्योद्धृत्य सिकताः पश्यतस्तस्य सोर्मिणि ।।

**Group II**

(i) तन्मूलं गुरुतायास्तत्सौख्यं तद्यशस्तदौर्जित्यम् ।
तत्सौभाग्यं पुंसां यदेतदप्रार्थनं नाम ।।

(ii) अणुपूर्वं बृहत्पश्चाद् भवत्यार्येषु सङ्गतम् ।
विपरीतमनार्येषु यथेच्छसि तथा कुरु ।।

**Group III**

(i) अव्यक्तं व्यापकं नित्यं गुणातीतं चिदात्मकम् ।
व्यक्तस्य कारणं वन्दे व्यक्ताव्यक्तं तमीश्वरम् ।।

(ii) अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः ।
यथाऽऽस्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं ददाति ।।

**Group IV**

(i) यैः सततं मातृभूः सेविता
स्वशोणितेन च धरणी रक्ता
कारगिलमखे स्वप्राणास्तैर्हुताश्च सोल्लासम्
हौतात्म्यं तद् ध्वजोत्तमाङ्गे कषायतां प्राप्तम् ।
कषायवर्णो ध्वजस्थितो मां प्रेरयते सततम्
'जयतु जवानो' वदन्ती ह्यहं नमामि योद्धारम् ।।

**Q.II. (A) Answer *any two* questions in English from group I and II each : 8**

**Group I**

(i) Who came in Swamiji's way ? What did they do ?

(ii) How did लेरसिया change his look ?

(iii) Suggest Sanskrit words for following English words - www, Cyberspace, E-commerce, Online Banking.

**Group II**

(i) According to the poem नमामि राष्ट्रध्वजम् what does the white colour suggest?

(ii) State the फारुकी family.

(iii) Which seven समिध् give wealth ?

**Q.II. (B) Complete *any two* verses of the following : 4**

(i) यस्य ................ बृहस्पतिः ।।

(ii) रागे ................ प्रशस्यते ।।

(iii) मित्रं ................ विपत् ।।

(iv) समुपा०................ महामान्यः ।।

**Q.II. (C) Complete *any one* verse based on a metre : 2**

(i) उपेन्द्रवज्रा (ii) इन्द्रवज्रा

**Q.III. (A) Write 5 sentences in Sanskrit on *any one* topic given below: 5**

(i) दीपावलिः (ii) दूरदर्शनम् (iii) संस्कृतभाषा

**OR**

**Translate *any five* sentences in Sanskrit :**

(i) I saw a tiger in the dense forest.

(ii) Courage is the greatest ornament of a man.

(iii) The trees grow on the mountain.

(iv) Trees make the passers-by happy by their shadow.

(v) Rainbow is seen in the sky in monsoon.

(vi) I go to library.

(vii) A cat likes milk.

(viii) The good people never give up the just path.

**Q.IV. (A) Rewrite the following sentences according to the order : 5**

(i) ताभ्यां ज्ञातं यद् ग्रामे एकोऽभद्ररूपः कश्चिज्जनो जीर्णवस्त्राधानः क्षुत्पीडितः स्थितः ।

(ii) तथापि वयमिच्छामो यद् भवानस्माकं जीर्णकुटीमागच्छतु प्रज्वलिताग्नेरुष्णतां चानुभवतु ।

(iii) तस्मिन् जनस्थाने द्वौ भ्रातरौ न्यवसताम् यावतीव अधनौ परं मनसोदारौ करुणापरौ च ।

(iv) न कश्चन तेन सह वार्तामपि करोतीति ।

(v) तयोरेकस्तस्य समीपं गत्वाऽवदत्, ''भद्र, वयं तु अधनाः ।''

**OR**

**(B) Answer *any five* question in Sanskrit :**

(i) ग्रामं प्रविश्य लेरसिया सहकारिणश्च कुत्र स्थिताः ?

(ii) कः रसः रसिकान् प्रेरयति ?

(iii) मानवस्य कः श्रेष्ठाविष्कारः ?

(iv) सः कस्याः देवतायाः मन्दिरम् अगच्छत् ?

(v) केन विना राज्यं न शोभते ?

(vi) कः परोऽपि बन्धुः ?

(vii) केन सह संगतिः न कुर्यात् ?

(viii) सिकतासेतुनिर्माणं किमर्थं न शक्यम् ?

**Q.V. (A) Translate *any one* unseen passage / dialogue into English : 5**

(i) दक्षिणभारते सागर-मध्ये एकं लघुद्वीपं वर्तते । तस्मिन् द्वीपे सागरतरङ्गैः क्षाल्यमानं प्राचीनं नगरं कन्याकुमारी इति अस्ति । त्रयाणां सागराणां जले प्रतिबिम्बितं सूर्योदयस्य दृश्यम् अद्भुतमेव । सूर्यस्य क्रमशः अरुणा पीता धवला च शोभा दर्शकान् मन्त्रमुग्धान् करोति । एकदा स्वामिविवेकानन्दः समुद्रजले स्थितायामेकस्यां बृहत्-शिलायाम् उपविष्टः त्रीणि दिनानि ध्यानमग्नः जातः । एतस्यां शिलायाम् एव विवेकानन्दकेन्द्रं विकसितमस्ति । अत्र आगत्य साधकाः ध्यानं साधनां च कृत्वा जीवनं सफलं कुर्वन्ति ।

(ii) (मनोरुग्णः मिलिन्दः - प्रभाते प्रतिवेशिनं प्रति गत्वा उच्चैः आक्रोशति ।)

मिलिन्दः – सखे परित्रायस्व माम् । रात्रौ मम मुखद्वारेण मार्जारशावकः उदरे प्रविष्टः । श्रृणु गुर्गुरायते ।

निनादः – वयस्य न मार्जारशावकः परमेष वातविकारः । भिषग्वरं प्रति गच्छाव ।

मिलिन्दः – न न भिषग्वरं प्रति परं शल्यक्रियाविशारदं प्रति गन्तव्यम् ।

निनादः – सत्यं खलु न मूर्खजनचित्तं समाराधयेत् । चल त्वरया ।

(iii) वसन्तसेना - रदनिके, स्वागतं ते । कस्य पुनः एष दारकः ? ननु चन्द्रमाः इव मुखम् अस्य।

रदनिका - जानीहि एतम् आर्यचारुदत्तस्य पुत्रं रोहसेनम् ।

वसन्तसेना - किं निमित्तं रोदिति एषः ?
रदनिका - अस्ति अस्माकं धनिकः प्रतिवेशिकः । तस्य दारकस्य सुवर्णशकटिकया अक्रीडत् एषः। अतः तादृशीम् एव शकटिकां देहि इति भणति । किं करवाणि । न जानीते तातस्य दारिद्र्यम् ।
वसन्तसेना - एष तत् कथं जानीयात् । बालः खलु एषः ।

**Q.V. (B) Translate *any one* group of verses into English : 4**

**Group I**

(i) कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ।।

(ii) पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते ।
अस्तब्धत्वमचापल्यं प्रत्यक्षेणावगम्यते ।।

**Group II**

(i) एकोऽपि रोपितो वृक्षः पुत्रकार्यकरो भवेत् ।
देवान्प्रसूनैः प्रीणाति छायया चातिथिं तथा ।
फलैर्मनुष्यान्प्रीणाति नारक्यं नास्ति पादपे
अपि पुष्पफलैर्हीने द्रुमे पान्थस्य विश्रमः ।।

**Group III**

(i) गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः ।
आस्वाद्यतोयाः प्रभवन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः ।।

**Q.VI. Answer in English : (*Any two*) 4**

(i) According to मार्कंडेय, how should be the paintings of different types of people ?

(ii) How is the importance of painting described in विष्णुधर्मोत्तरपुराणम्?

(iii) What responsibility did डॉ. बाबासाहेब आंबेडकर accept ?

(iv) How did डॉ. बाबासाहेब आंबेडकर display his proficiency in संस्कृत ?

**Q.VII. Complete the story.** **5**

अस्ति नर्मदातीरे पर्वतोपत्यकायां _________ शाल्मलीतरुः । तत्र निर्मितेषु _________ पक्षिणः वर्षास्वपि सुखेन निवसन्ति । अथैकदा धारासारैर्महती _________ बभूव । तदा तरुतले अवस्थितान् शीतार्तान् _________ वानरानवलोक्य पक्षिभिरुक्तम् अस्माभिश्चञ्चुभिस्तृणानि नीडाः निर्मिताः । यूयं हस्तपादादिसंयुताः अपि किमवसीदथ । तच्छ्रुत्वा वानराः ______ ।
(कम्पमानान्, विशालः, क्रुद्धाः, वृष्टिः, नीडेषु )

**OR**

**Make *any five* sentences in Sanskrit by using indeclinables / governing cases :**

(i) विना (ii) कृते (iii) समीपे
(iv) सह (v) वि + रम् (vi) दा
(vii) रुच् (viii) स्निह्

**Q.VIII. Solve *any five* sub-questions from the following :** **15**

**(A) Recognize *any three* of the following forms :**

(i) पित्रा (ii) अस्मिन् (iii) वीक्ष्य
(iv) ययौ (v) ददति

**(B) Dissolve and name the compounds : (*Any three*)**

(i) प्रतिदिनम् (ii) अनिच्छया (iii) पक्षिमित्रैः
(iv) मृत्प्रतिमा (v) शीतर्तौ

**(C) Dissolve sandhis : (*Any three*)**

(i) अणुभ्योऽपि (ii) एतन्निशम्य (iii) विद्यलयेष्वपि
(iv) वागणयित्वा (v) सहायकैर्वैद्यैः

**(D) Give Sanskrit sntonym of the following words : (*Any three*)**

(i) ऊर्जा (ii) वैद्यः (iii) पत्नी
(iv) ग्रामः (v) खगः

**(E) Complete *any three* of the following sentences by choosing the suitable alternative given in the brackets :**

(i) सः ................ ग्रामं गतः । ( दूरवर्तिनं / दूरवर्तिनि / दूरवर्ति )
(ii) किं कारणं ........... जिज्ञासायाः । ( ते / त्वां / त्वया )

(iii) नरेन्द्रस्य ............ मूर्तिः पतिता । ( हस्तेन / हस्तात् / हस्तस्य )

(iv) धनस्य हस्तान्तरणमनेन तन्त्रज्ञानेन कर्तुं शक्नुमः ............ ।
( अहम् / आवाम् / वयम् )

(v) एष महाजनः नास्माभिः .............. । ( विज्ञातः / विज्ञातम् / विज्ञातवान् )

**(F) Do as directed : (*Any three*)**

(i) सारङ्गागाराः खगैः अङ्गीकृताः । (Use 'खगाः' instead of 'खगैः')

(ii) विद्युत्प्रवाहे खण्डिते एतादृशी चर्चा प्रारब्धा । (Remove absolute locative)

(iii) मनुष्यः नन्दति । (Make sentence causative)

(iv) सोमशर्मा नाम धनिको निवसति स्म । (Remove स्म)

(v) एषः पुत्तलः सर्वेषां नेत्रसुखविषयः विराजते । (Make sentence plural.)

***Best Of Luck***

# MT - 172

2013 .... .... 1200

MT - 172 - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM I - PAPER - III

**Time : 2 Hours** **Preliminary Model Answer Paper** **Max. Marks : 40**

| | | |
|---|---|---|
| **A.I.** | **(A) Translate *any three* of the following passages into English :** | |
| (i) | This ancient story tells us how to make use of everything. In producing even small things, natural resources and human efforts are necessary. We purchase a beautiful thing and easily dispose it away if we don't like it. We must bear in mind that a thing is useful in one or the other way. Giving up the concept of use and throw, make use of things again and again. The Indian concept of not making an unnecessary purchase should be followed. One should always remember that everything is precious. | **5** |
| (ii) | The next day unwillingly सोमशर्मा went to अनन्तभट्ट on foot itself. सोमशर्मा who was delighted by the walk in the rays of the rising sun said, "May the respected one please treat quickly. I have to go soon (immediately)". अनन्तभट्ट said, "Oh, may the respected one return after completing daily morning routine chores and bathing in the water of flowing spring near the garden". सोमशर्मा who was dejected due to अनन्तभट्ट's order took a bath after going to that place. | **5** |
| (iii) | After the studies were over, Respected Rothfield introduced him to the preceptor Respected रवीन्द्रनाथ टागोर. According to the saying 'a talented one recognizes another talented one', he was invited to Kolkata by respected रवीन्द्रनाथ. There a full-length statue of श्रीरामकृष्ण परमहंस was created for the बेल्लूर mission by विनायक. Knowing the talent of this one, who was busy (engrossed in) making images of the Respected रवीन्द्रनाथ, गान्धी, etc., he was sent to the Royal Academy situated in London by the head of Tata Company. | **5** |
| (iv) | Two or three days are not sufficient to see such a huge forest because its area is expansive and full of variety. Different kinds of | **5** |

| | | |
|---|---|---|
| | places have been created here for various types of birds. Dry grasslands for land-birds, water-bodies or marshy ponds for aquatic birds as well as huge trees that become dwellings for tree-birds also exist here. Many trees have been occupied here for dwelling by different colourful birds. Birds living on trees, grassland-birds and aquatic birds as well, live here in huge numbers. | |
| (v) | Teacher : Nine रस्s known are love, humour, fiery, compassion, heroism (bravery), amazement, disgust, horror and likewise peace. In this science (of drama) the deities and colours of all the sentiments have been described.<br>Aditi : Teacher, now you may tell me specifically about the रस of heroism.<br>Teacher : Yes. Enthusiasm is the main trait/quality of the sentiment of heroism. It also energizes (enthuses) others. Another characteristic is determination, i.e. firm resolve and extreme effort. Another characteristic is stable intellect. रस should be evoked through effective acting, stability, courage, bravery, pride, enthusiasm, valour etc. | **5** |
| **A.I.** | **(B) Translate *any two* groups of verses into English :**<br>**Group I** | |
| (i) | A man, despite being born in a dignified / noble family and possessing virtues, is respected due to good company. The staff / stem of a Veena though made of bamboo and possessing strings attached to a deformed / broken bitter pumpkin does not attain greatness (does not produce melody). | **2** |
| (ii) | And having come there, while he (the boy) was looking at him, picking up again and again, he (इन्द्र) threw sand from the banks of गङ्गा into the water full of waves. | **2** |
| | **Group II** | |
| (i) | That which is not begged from others is the root cause of greatness, joy, success, strength and fortune of men. | **2** |

| | | |
|---|---|---|
| | **Explanation** : That is real greatness, success, strength and joy which is acquired with one's own hard work, not that which is obtained by begging from others. When we beg from others we lose our self respect. | |
| (ii) | The company of the noble ones is short in the beginning, but great (beneficial) later on. That among the vicious (lowly) is contrary to this, you may do as you wish.<br>**Explanation** : The friendship of virtuous ones may not bear immediate results but will surely be beneficial in the long run. | **2** |
| | **Group III** | |
| (i) | I salute to that Lord, who is invisible, all-pervading, eternal, beyond all attributes, sentient who is the cause of all that is manifest and that is not completely manifest by that which is manifest. | **2** |
| (ii) | Oh the greatness of the noble ones is indeed unique, that they help others even during times of calamity, just as the moon, which, even though fallen into the mouth of the demon jeng, gives a multitude of merit.<br>**Explanation** : Though an eclipse that is the calamity for the moon, a man through religious activities gets merit in it. | **2** |
| | **Group IV** | |
| (i) | That martyrdom/sacrifice done by those who constantly served the motherland and painted the land red with their own blood, and happily offered the oblations of their own lives in the कारगिल sacrifice attained saffron colour at the topmost part of the National flag. The saffron colour on the flag inspires me continuously. Indeed uttering the words "जय जवान" (may the soldier triumph), I salute to the soldier. | **4** |
| **A.II.** | **(A) Answer *any two* questions in English from group I and II each :** | |
| | **Group I** | |
| (i) | Once when स्वामी विवेकानन्द returned from the अन्नपूर्णा temple at वाराणसी, | **2** |

| | | |
|---|---|---|
| | he had an unusual experience. He saw that a group of monkeys was chasing him. When he stopped, they would stop as well and when he started walking, they would start following him. He was quite tense and in order to avoid the monkeys, he started running. But the monkeys got more violent and tried to bite him. | |
| (ii) | Once लेरसिया went to certain remote village with his colleagues. Before entering the village, he hit himself by strokes of whip very badly. Due to that, marks of strokes appeared on his body. He also applied the pulp of a certain medicine due to which his body started swelling. Being defaced he looked like a poor and sick person. He was looking more pitiable as he applied the clay on his body. | **2** |
| (iii) | Sanskrit words for English ones are as follows :<br>www - विश्वव्यापिजालम् ।<br>Cyberspace - सङ्गणकजालान्तरिक्षम् ।<br>E-commerce - सङ्गणकीयवाणिज्यम् ।<br>Online banking - सद्यस्ककुसीदवृत्तिः । | **2** |
| | **Group II** | |
| (i) | India has achieved success in the field of science and technology. At पोखरण, India conducted her first nuclear test successfully. This success can be seen in white colour. Indian scientists are also successful in computer science. They are the magicians in modern age. The glorious achievement in the field of science is symbolized by white colour. This white colour encourages poetess and makes her heart full of pride. Therefore, she salutes these scientists by saying 'जय विज्ञान'. | **2** |
| (ii) | The lineage of the Farooqi family is described in the Burhanpur stone inscription as follows :<br>King Malik - Gazni-naresh - Kesar Khan - Hasan - Adil Shah (I) - Mubarak - Adil Shah (II). The mosque where this stone inscription is found, was built by Adil Shah (II) for fulfilling his righteous duties towards Islam. | **2** |

(iii) For performing sacrifices and obtaining the blessings of God, one needs various resources that are known as समिध्. Likewise, for attaining prosperity, one needs means like determination, forgiveness, kindness, honesty, compassion, soft speech and loyalty towards friends. **2**

**A.II. (B) Complete *any two* verses of the following :**

(i) यस्य **न ज्ञायते वीर्यं न कुलं न विचेष्टितम् ।** **2**
**न तेन सङ्गतिं कुर्यादित्युवाच** बृहस्पतिः ।।

(ii) रागे **द्वेषे च माने च द्रोहे पापे च कर्मणि ।** **2**
**अप्रिये चैव कर्तव्ये चिरकारी** प्रशस्यते ।।

(iii) मित्रं **प्रीतिरसायनं नयनयोरानन्दनं चेतसः** **2**
**पात्रं यत् सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभम् ।**
**ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला -**
**स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां** विपत् ।।

(iv) समुपा**गतवति दैवादवहेलां कुटज मधुकरे मा गाः ।** **2**
**मकरन्दतुन्दिलानामरविन्दानामयं** महामान्यः ।।

**A.II. (C) Complete *any one* verse based on a metre :**

(i) **उपेन्द्रवज्रा** - अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः । **2**
यथाऽऽस्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं ददाति ।।

(ii) **इन्द्रवज्रा** - ज्ञानेन पुंसां सकलार्थसिद्धिर्ज्ञानादृते काचन नार्थसिद्धिः । **2**
ज्ञानस्य मत्वेति गुणान् कदाचिज्ज्ञानं न मुञ्चन्ति महानुभावाः ।।

**A.III. (A) Write 5 sentences in Sanskrit on *any one* topic given below:**

(i) **दीपावलिः** **5**

भारतीयाः तु उत्सवप्रियाः भारते च विविधपर्वाणि सम्पद्यन्ते । भारते दीपावलिः अतीव महत्त्वपूर्णा । अस्मिन्नेव दिने श्रीरामः वनवासतः अयोध्यां प्रत्यागतः । तस्य स्वागतं जनैः दीपमालाभिः कृतम् । ततः प्रभृति भारतीयाः अस्मिन्नेव दिने रात्रौ दीपमालां कृत्वा स्वगृहाणि भूषयन्ति । जनाः नूतनवस्त्राणि धारयन्ति मिष्टान्नानि च भक्षयन्ति । गृहिण्यः

गृहस्य शोभां रङ्गावलिभिः वर्धयन्ति । रात्रौ लक्ष्मीपूजनं कुर्वन्ति । सर्वे परस्परं मिलित्वा मङ्गलकामनां कुर्वन्ति ।

(ii) **दूरदर्शनम्** 5

अधुना गृहे गृहे दूरदर्शनसंचाः वर्तन्ते । दूरदर्शनं मनोरंजनस्य उत्तमं साधनं तु अस्ति एव । तथापि दूरदर्शनस्य माध्यमेन एकतः उपविश्य एव वयं जगति यत् प्रचलति तद् ज्ञातुं शक्नुमः । विश्वविख्याताः राजनीतिज्ञाः कलाकाराः च अस्माकं परिचिताः भवन्ति । जगति कुत्रापि क्रीड्यमानाः क्रीडास्पर्धाः वयं गृहे उपविश्य एव सुखेन अवलोकयामः । बालानां कृते उपयुक्ताः कार्यक्रमाः प्रसारिताः भवन्ति । लोकशिक्षणार्थं दूरदर्शनस्य माध्यमम् अत्यन्तम् उपयुक्तम् । परं सातत्येन दूरदर्शनस्य अवलोकनं नेत्राणां कृते हानिकारकं एव भवति । यथा दूरदर्शनं हितकारकं तथैव हानिकारकं भवति ।

5

(iii) **संस्कृतभाषा**

संस्कृतभाषा प्राचीनतमा भारतीया भाषा । सा सर्वभारतीयभाषाणां जननी । संस्कृतभाषा ज्ञानस्य महत् भाण्डारम् एव । संस्कृतभाषायां यथा वेदपुराणादिग्रन्थाः सन्ति तथैव विविधशास्त्रग्रन्थाः सन्त्यपि । संस्कृतिरक्षणार्थं संवर्धनार्थं च संस्कृतभाषायाः अध्ययनम् आवश्यकम् । संस्कृतभाषा सङ्गणकयोग्या अस्ति इति अपि सिद्धम् । सत्यमेव उक्तम् - 'भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।'

**OR**

**Translate *any five* sentences in Sanskrit :**

(i) अहं निबिडे अरण्ये व्याघ्रम् अपश्यम् । 1
(ii) धैर्यं मनुजस्य श्रेष्ठं भूषणम् अस्ति । 1
(iii) वृक्षाः / द्रुमाः / पादपाः पर्वते रोहन्ति / वर्धन्ते । 1
(iv) वृक्षाः तेषां छायया पथिकान् आनन्दयन्ति । 1
(v) वर्षायां / वर्षर्तौ गगने इन्द्रधनुः दृश्यते । 1
(vi) अहं ग्रन्थालयं गच्छामि । 1
(vii) मार्जाराय दुग्धं रोचते । 1
(viii) सत्पुरुषाः न्याय्यमार्गं न कदापि त्यजन्ति । 1

**A.IV.** **(A) Rewrite the following sentences according to the order :**

(i) तस्मिन् जनस्थाने द्वौ भ्रातरौ न्यवसताम् यावतीव अधनौ परं मनसोदारौ करुणापरौ च । 1
(ii) ताभ्यां ज्ञातं यद् ग्रामे एकोऽभद्ररूपः कश्चिज्जनो जीर्णवस्त्राधानः क्षुत्पीडितः स्थितः । 1
(iii) न कश्चन तेन सह वार्तामपि करोतीति । 1
(iv) तयोरेकस्तस्य समीपं गत्वाऽवदत्, ''भद्र, वयं तु अधनाः ।'' 1
(v) तथापि वयमिच्छामो यद् भवानस्माकं जीर्णकुटीमागच्छतु प्रज्वलिताग्नेरुष्णतां चानुभवतु । 1

| | | |
|---|---|---|
| | **OR** | |
| | **Answer *any five* question in Sanskrit :** | |
| (i) | ग्रामं प्रविश्य लेरसिया सहकारिणश्च **मध्यचतुष्पथं** स्थिताः । | 1 |
| (ii) | **वीररसः रसिकान् उत्साहयति उत्साहपूर्णान् वा करोति अतः एषः** रसः रसिकान् प्रेरयति । | 1 |
| (iii) | **विविधेषु संशोधनेषु मानवस्य अन्तर्जालम् इति** (internet) श्रेष्ठाविष्कारः अस्ति । | 1 |
| (iv) | सः **स्वामी अन्नपूर्णायाः देवतायाः** मन्दिरम् अगच्छत् । | 1 |
| (v) | **न्यायेन** विना राज्यं न शोभते । | 1 |
| (vi) | **परः अपि यः हितवान् सः बन्धुः** विद्यते । | 1 |
| (vii) | **यस्य वीर्यं, कुलं, विचेष्टितं च न ज्ञायते,** तेन सह सङ्गतिः न कुर्यात् । | 1 |
| (viii) | **सिकता ओघहार्या वर्तते अतः गङ्गायां** सिकतासेतुनिर्माणं न शक्यम् । | 1 |
| **A.V.** | **(A) Translate *any one* unseen passage / dialogue into English :** | |
| (i) | In southern India, there is a small island in the sea. There on the island washed by the waves of the sea, there is an ancient town named 'कन्याकुमारी.' The scenery of sun-rise reflected in the waters of three oceans is indeed amazing. The sun's red luster which gradually becoming yellow and bright (white) mesmerizes the viewers. Once, स्वामी विवेकानन्द, seated upon a huge rock situated in the ocean-water, got engrossed in meditation for three successive days. The 'Vivekananda Kendram' has been developed on this same rock. Aspirants after coming here perfoming meditation and practise consider make their lives worthy. | 5 |
| (ii) | ( मिलिन्द who is psychologically challenged, goes to the neighbour in the early morning and yells. )<br>Milind – O friend, save me, save me. At night, a kitten entered my stomach through the mouth. Listen, its crying.<br>Ninad – O friend, it's not a kitten, It's gases. Let's go to a physician.<br>Milind – No, not to a physician, but we should go to a surgeon.<br>Ninad – Indeed, that's true. One should not attempt to please the mind of a fool. Let's go quickly. | 5 |
| (iii) | वसन्तसेना - O! Radanika, you are welcome. Whose son is this ? Indeed the face of this one is like a moon. | 5 |

| | | |
|---|---|---|
| | रदनिका - Know this one as रोहसेन, the son of the noble चारुदत्त.<br>वसन्तसेना - For what reason does he cry ?<br>रदनिका - Our neighbour is a rich man. This one played with his son's golden cart. Therefore, he says, 'give a cart like that only'. What can I do ? He doesn't know about (his) father's poverty.<br>वसन्तसेना - How would this one know that ? This one is indeed a child. | |
| **A.V.** | **(B) Translate *any one* group of verses into English :** | |
| | **Group I** | |
| (i) | The success (result) of men depends on action, intelligence also follows action. Even then, a wise man should act only after proper contemplation.<br>**Explanation** : Though our past actions or Karma decide what we get in life, it is necessary that we act only after prudent thinking and having the right intention. | **2** |
| (ii) | Excellence and truthfulness is understood in the course of conversation, while ones fickleness or firmness is understood by actual observation. | **2** |
| | **Group II** | |
| (i) | The heart of the virtuous, if ever broken, is undoubtedly easily joint like gold at once. The broken heart of the wicked is never put together, just like the potter's broken and shattered earthen pot which is never joint.<br>**Explanation** : Good people though hurt do not keep grudges for long. They forgive and forget soon. Even in the worst of circumstances the virtuous ones will be helpful to others. The wicked, however hold on to the grudges and become revengeful and are never helpful to anybody. | **4** |
| | **Group III** | |
| (i) | Virtues remain virtues among those who know virtues. They become | **4** |

| | | |
|---|---|---|
| | faults when they reach the non-meritorious. Rivers originate as tasty water. However, having reached sea, they become unfit for drinking. | |
| **A.VI.** | **Answer in English : (*Any two*)** | |
| (i) | Sage मार्कंडेय has spoken of about various aspects regarding the characteristics of a painting. There are different codes for people of different nature. Like, the eyebrows of a calm person should be like crescent moon whereas of a dancer, they should be in bow like shape. The images of deities should have various ornaments. Their faces should be pleased, charming whereas their attires should be of silk etc. The images of sages, seers should be with hair locks, bark. They should look weak but lustrous. | **2** |
| (ii) | In the treatise named विष्णुधर्मोत्तरपुराणम्, there is detailed explanation about painting. The conversation between 'मार्कंडेय' and King वज्र is famous in that treatise. When King वज्र asks 'what is the means of achieving happiness in all worlds' sage मार्कंडेय described the importance of painting. He said 'just as सुमेरु is greatest among mountains, eagle is among birds, king is among men are great likewise among all arts painting is the greatest art. Due to that not only artists but also common people become happy.' He further says 'all aims like धर्म, अर्थ, काम, मोक्ष can be achieved through painting. It is said to be auspicious when paintings are placed. | **2** |
| (iii) | After the attainment of freedom, डॉ. बाबासाहेब आंबेडकर was appointed as minister of law in the cabinet of first Prime Minister पं. जवाहरलाल नेहरु. Along with that he also accepted the post of chairman of the drafting committee of Indian Constitution. Disregarding the burden of work he was always engrossed in work. | **2** |
| (iv) | डॉ. बाबासाहेब आंबेडकर was fond of Sanskrit language. He also knew the importance of Sanskrit which was the language of the gods and wanted to give it the status of national language. Pertaining to this proposal, a discussion took place in the Parliament wherein पं. | **2** |

| | | |
|---|---|---|
| | लक्ष्मीकान्त मैत्र asked him few doubts in Sanskrit to test his knowledge of Sanskrit. डॉ. बाबासाहेब आंबेडकर replied in Sanskrit itself. All members were surprised to listen to that conversation. | |
| **A.VII.** | **Complete the story.** | |
| | अस्ति नर्मदातीरे पर्वतोपत्यकायां **विशालः** शाल्मलीतरुः । तत्र निर्मितेषु **नीडेषु** पक्षिणः वर्षास्वपि सुखेन निवसन्ति । अथैकदा धारासारैर्महती **वृष्टिः** बभूव । तदा तरुतले अवस्थितान् शीतार्तान् **कम्पमानान्** वानरानवलोक्य पक्षिभिरुक्तम् अस्माभिश्चञ्चुभिस्तृणानि नीडाः निर्मिताः । यूयं हस्तपादादिसंयुताः अपि किमवसीदथ । तच्छ्रुत्वा वानराः **क्रुद्धाः** । | **5** |
| | **OR** | |
| | **Make *any five* sentences in Sanskrit by using indeclinables / governing cases :** | |
| (i) | **जलं / जलेन / जलात् विना** मत्स्याः न जीवन्ति । | **1** |
| (ii) | **छात्राणां कृते** व्यायामः आवश्यकः । | **1** |
| (iii) | **श्रीगणेशस्य समीपे** मूषकः अस्ति । | **1** |
| (iv) | माता **बालकेन सह** गच्छति । | **1** |
| (v) | धीराः **निश्चितार्थात्** न **विरमन्ति** । | **1** |
| (vi) | जनकः **पुत्राय/ कन्यायै** उपहारं यच्छति । | **1** |
| (vii) | **श्रीगणेशाय** मोदकाः **रोचन्ते** । | **1** |
| (viii) | अध्यापकः **छात्रेषु स्निह्यति** । | **1** |
| **A.VIII.** | **Solve *any five* sub-questions from the following :** | |
| **(A)** | **Recognize *any three* of the following forms :** | |
| (i) | पित्रा - पितृ noun ending in ऋ<br>Masculine gender<br>Instrumental singular. | **1** |
| (ii) | अस्मिन् - इदम् Third person pronoun<br>Masculine, Neuter gender<br>Locative singular. | **1** |
| (iii) | वीक्ष्य - Root वि + ईक्ष् (1 AP)<br>Gerund ल्यबन्त अव्यय. | **1** |

| | | |
|---|---|---|
| (iv) | ययौ - Root या (2 PP)<br>Perfect past tense<br>Third person singular. | 1 |
| | | 1 |
| (v) | ददति - Root दा (3 UP) here PP<br>Present tense<br>Third person plural. | |
| **(B)** | **Dissolve and name the compounds : (*Any three*)** | |
| (i) | प्रतिदिनम् - दिने दिने । - अव्ययीभाव समास । | 1 |
| (ii) | अनिच्छया - न इच्छा, तया । - नञ् तत्पुरुष समास । | 1 |
| (iii) | पक्षिमित्रैः - पक्षिणः मित्राणि येषां ते, तैः । - बहुव्रीहि समास । | 1 |
| (iv) | मृत्प्रतिमा - मृन्निर्मिता/मृदा निर्मिता प्रतिमा । - मध्यमपदलोपी कर्मधारय समास । | 1 |
| (v) | शीततौं - शीतः ऋतुः, तस्मिन् । - कर्मधारय समास । | 1 |
| **(C)** | **Dissolve sandhi as following : (*Any three*)** | |
| (i) | अणुभ्योऽपि - अणुभ्यः + अपि । | 1 |
| (ii) | एतन्निशम्य - एतत् + निशम्य । | 1 |
| (iii) | विद्यालयेष्वपि - विद्यालयेषु + अपि । | 1 |
| (iv) | वागणयित्वा - वा + अगणयित्वा । | 1 |
| (v) | सहायकैर्वैद्यैः - सहायकैः + वैद्यैः । | 1 |
| **(D)** | **Give Sanskrit synonym of the following words : (*Any three*)** | |
| (i) | ऊर्जा - शक्तिः, बलम् । | 1 |
| (ii) | वैद्यः - चिकित्सकः । | 1 |
| (iii) | पत्नी - जाया, भार्या । | 1 |
| (iv) | ग्रामः - पुरी, पत्तनम्, पुरम् । | 1 |
| (v) | खगः - द्विजः, पक्षी, विहगः, शकुनिः, शकुन्तः । | 1 |
| **(E)** | **Complete *any three* of the following sentences by choosing the suitable alternative given in the brackets :** | |
| (i) | सः **दूरवर्तिनं** ग्रामं गतः । | 1 |
| (ii) | किं कारणं **ते** जिज्ञासायाः । | 1 |
| (iii) | नरेन्द्रस्य **हस्तात्** मूर्तिः पतिता । | 1 |

| | | |
|---|---|---|
| (iv) | धनस्य हस्तान्तरणमनेन तन्त्रज्ञानेन कर्तुं शक्नुमः **वयम्** । | 1 |
| (v) | एष महाजनः नास्माभिः **विज्ञातः** । | 1 |
| | | |
| **(F)** | **Do as directed : (*Any three*)** | |
| (i) | सारङ्गागारान् **खगाः अङ्गीकृतवन्तः** । | 1 |
| (ii) | **यदा विद्युत्प्रवाहः खण्डितः तदा** एतादृशी चर्चा प्रारब्धा । | 1 |
| (iii) | **सुवार्ता** मनुष्यं **नन्दयति** / **नन्दयते** । | 1 |
| (iv) | सोमशर्मा नाम धनिको **न्यवसत्** । | 1 |
| (v) | **एते पुत्तलाः सर्वेषां नेत्रसुखविषयाः विराजन्ते** । | 1 |

❖❖❖❖